आचार्य जीवन शर्मा

# बृहत्तर-वैदिक-अध्ययन-परिषदा समायोजितः परिसम्वादः

## विषयः-वेदोक्तं सूर्यस्य वैशिष्ट्यम्

**'बृहत्तर-वैदिक-अध्ययन-परिषद्'** (WAVES) इत्याख्यया संस्थया **'वेदोक्तं सूर्यस्य वैषिष्ट्यम्'** इति विषयमाधृत्य एकदिवसीयः परिसम्वादः 8.4.2017 दिनांके नवदेहलीस्थरामकृष्णपुरम्-आर्यसमाजस्य सभागारे समायोजितः। डॉ. रणजितबेहेराद्वारा समाचरिताभ्यां वैदिक-लौकिकमंगलाचरणाभ्यां परिसम्वादोऽसौ समारब्धः। रामकृष्णपुरम्-आर्यसमाजस्य सचिवः डा. सूर्यपालसिंहः आध्यक्ष्यपदं निर्व्यूढवान। परिसम्वादसभायाः मुख्यवक्त्र्यवर्तत बृहत्तर-वैदिक-अध्ययन-परिषदः (वेब्ज) महासचिवा तथा राष्ट्रपतिसम्मानेन विभूषिता प्रो.शशितिवारी। कार्यक्रमस्यास्य संचालिका वेब्ज-संस्थायाः संयुक्तसचिवा डा. अपर्णाधीरमहोदया समेषां स्वागतं व्यदधात्। सम्वादेऽस्मिन् प्रो. भूदेवशर्मा, डा. रणजितबेहेरा, डा. गणेशदत्तशर्मा, डा. आशापाण्डेय, डा. विजयशंकरद्विवेदी, डा. वेदवतीवैदिक, श्री एच.एल. कोहलीप्रभृतयो वक्तोरोऽवर्तन्त।







मुख्यवक्त्र्या प्रो. तिवारी महोदया स्वीकीयभाषणे समुचितं प्रतिपदितं यत् सकलं ब्रह्माण्डमेनत् वैज्ञानिकसिद्धान्तमाधृत्य विरचितम्। ब्रह्माण्डविषये वैदिक-ऋषीणां सुमहती दृष्टिर्ववर्तते। यास्काचार्येण निरुक्तस्य सप्तमाध्यायस्य द्वितीयपादे तिसृणां देवतानां चर्चा विहिता, तद्यथा - तिस्त्र एव देवता इति नैरुक्ताः। अग्निः पृथ्वीस्थानः वायुर्वेन्द्रो वान्तरिक्षस्थानः। सूर्यों द्युस्थानः। विविधकार्यानुसारमासां तिसृणां देवतानां बहूनि नामधेयानि भवन्ति। तिस्त्रः देवता इमाः ऊर्जसः विविधरूपाणि वर्तन्ते, तद्यथा - पृथिव्यामग्निः, अन्तरिक्षे वायुः द्युलोके सूर्यश्च। अन्या ऊर्जांसि आस्वेव वरिवर्तन्ते। सृष्टेः संरचनायाः प्राक् सूर्यस्यापि महत्त्वं नासीदिति स्वीकर्तुं शक्यते।





पुनश्च सूर्यस्य वैशिष्ट्यप्रतिपादयित्र्या तथा उक्तं यत् ऋग्वेदसंहितादृशा प्रमुखाः पञ्च सौरदेवताः-सूर्यः, सविता, पूषा, मित्रः विष्णुश्च। विविधैः सूक्तैः मन्त्रैः वा इमाः देवताः स्तुताः। गौणरूपेणापि सौरदेवताः स्तुताः, तद्यथा-भगः, अर्यमान्, विवस्वत्, आदित्यादयः। वैदिकमन्त्रेषु स्तुतं यत् नैकाधिकरोगाणां विनाशको वर्तते सूर्योऽसौ। ऋग्वेदेऽपि हृद्रोगस्य पाण्डुरोगस्य च निवारणाय सूर्यः स्तुतः। स्वास्थ्य-समृद्धि-सुखादिप्रास्यै वेदोक्तमन्त्रैः सौरदेवताः विष्टुताः। अतोऽस्मात् परिज्ञायते यत् वैदिकदेवता-सूर्यः प्रमुख एव। वैदिकवाङ्मयेतरसाहित्येऽपि सूर्यस्य स्तुतिः संदृश्यते। रामायणे मर्यादापुरुषोत्तमेन आदित्यहृदस्तोत्रेण तथा च महाभारते धर्मराजेन युधिष्ठिरेण अष्टोत्तरशतनामस्तोत्रेण सूर्यः सम्यगर्चितः। स्तुतिपरम्परेयमपि पुराणेष्व परिलक्ष्यत एव।,

मुख्यवक्त्र्या: वक्तव्यानन्तरमपरे वक्तारः स्वमतान्युपस्थापयन्। प्रो. भूदेवशर्मा स्वकीयवक्तव्ये सौरोर्जसां वैशिष्टयं तस्य सर्वोच्चशक्तेश्च सम्बन्धः इत्यस्मिन्विषये समभाषत। पुनरपि तेन निगदितं यत् वैज्ञानिकसिद्धान्तानुमित्या मानवशरीराभ्यन्तरे विद्यमाना इमाः शक्तयोऽद्भूता एव।

तदनु डा. वेदवतीवैदिकमहोदया उपनिषद्भ्यः नैकेरुदाहरणैः सूर्यस्य महत्त्वं प्रतिपादितम्। डा.गणेशदत्तशर्मणा भणितं यत् वैदिक-ऋषिभिः सूर्यस्य स्तुतिः बहुधा कृता वर्तते। ब्रह्मण्डीयगतिविधीनां समयस्य च नियामको वर्तते सूर्योऽसौ।




डा. रणजितबेहेरा यास्काचार्यदृशा द्वादशादित्यानां स्वरूपं प्रत्यपादयत्। निरुक्तस्य द्वादशाध्याये यानि नामानि परिगणितानि तानीमानि सन्ति - सविता, भगः, सूर्यः, पूषाः, विष्णुः विश्वानरः, वरुणः, केशी, केशिनः, वृषाकपिः, यमः अज एकपात् च। एतेषां सर्वेषा कालविषयेऽपि चर्चा कृता।

तदनु श्रीयुतेन एच.एल.कोहलीमहोदयः ऐतिहासिकदृष्ट्या सूर्यस्य वैशिष्ट्यं कवितामाध्यमेन प्रास्तौत्। पुनरपि तेन सूर्यवंशिराजानामुल्लेखो विहितः स्वकीयायां कवितायाम्। डा. विजयशंकरद्विवेदिना कालं तथा च आदित्यस्य विविधरूपमुररीकृत्य स्वकीयं मतमुपस्थापितम्। डा. आशालतापाण्डेयमहोदया स्वानुभवेन साकं नेत्ररोगनिवारणार्थं सूर्यस्योपयोगिता चर्चिता।

स्ववसरेऽस्मिन् डा. मालाचन्द्रन्द्वारा लिखितस्य 'नैमिषारण्यचिन्तनम्' इत्याख्यस्य पुस्तकस्य विमोचनं प्रो. भूदेवशर्मणा कृतम्। परिसंवादसभायाः अन्ते अध्यक्षीयवक्तव्येनोद्बोधयता श्रीयुतेन सूर्यपालसिंहेन प्रमुखतया प्रो. शशितिवारीमहोदयायाः वक्तव्यं तथा चान्येषां वक्तव्यमपि नितरां प्रशंसितम्।

परिसंवादेऽस्मिन् प्रो. लल्लनप्रसादः, डा. चान्दभारद्वाजः, डा. सरोजचावला, डा. सतीशंकरः, डा. सरोजगुलाटी, वाई.के.वाध्वा, तिलकअरोड़ा, विद्यासागरवर्मा, डा. कान्ताराणी भाटिया, ईशनारंगः, डा.सुषमा चौधरी, डा. विरमा कुमारी, सुश्री प्रीतिवर्मा, प्रेमदेवली, सुश्री सुरुचिशर्मा, सुश्री पूजा-प्रभृतयो विद्वांसो विदुष्यश्च भागमवहन्।

अन्ते धन्यवादज्ञापनेन शान्तिपाठने च परिसंवादसभेयं समाप्तिमधिगता।

